# Gauridashakam

# ગૌરીદશકમ્ અથવા ગૌરી સ્તુતિઃ

## Document Information

Text title : gaurIdashakam

File name : gauri10.itx

Category : devii, pArvatI, stotra, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Sridhar Seshagiri

Proofread by : Sridhar Seshagiri

Description-comments : From stotrArNavaH 08-12

Latest update : January 22, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 11, 2024

*sanskritdocuments.org*

# ગૌરીદશકમ્ અથવા ગૌરી સ્તુતિઃ

॥ શ્રીઃ ॥

લીલાલબ્ધસ્થાપિતલુપ્તાખિલલોકાં
 લોકાતીતૈર્યોગિભિરન્તશ્ચિરમૃગ્યામ્ ।
બાલાદિત્યશ્રેણિસમાનદ્યુતિપુઞ્જાં
 ગૌરીમમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૧॥

પ્રત્યાહારધ્યાનસમાધિસ્થિતિભાજાં
 નિત્યં ચિત્તે નિર્વૃતિકાષ્ઠાં કલયન્તીમ્ ।
સત્યજ્ઞાનાનન્દમયીં તાં તનુરૂપાં
 ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૨॥

ચન્દ્રાપીડાનન્દિતમન્દસ્મિતવક્ત્રાં
 ચન્દ્રાપીડાલંકૃતનીલાલકભારામ્ ।
ઇન્દ્રોપેન્દ્રાદ્યર્ચિતપાદામ્બુજયુગ્માં
 ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૩॥

આદિક્ષાન્તામક્ષરમૂર્ત્યા વિલસન્તીં
 ભૂતે ભૂતે ભૂતકદમ્બપ્રસવિત્રીમ્ ।
શબ્દબ્રહ્માનન્દમયીં તાં તટિદાભાં
 ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૪॥

મૂલાધારાદુત્થિતવીથ્યા વિધિરન્ધ્રં
 સૌરં ચાન્દ્રં વ્યાપ્ય વિહારજ્વલિતાઙ્ગીમ્ ।
યેયં સૂક્ષ્માત્સૂક્ષ્મતનુસ્તાં સુખરૂપાં
 ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૫॥

નિત્યઃ શુદ્ધો નિષ્કલ એકો જગદીશઃ
 સાક્ષી યસ્યાઃ સર્ગવિધૌ સંહરણે ચ ।

વિશ્વત્રાણક્રીડનલોલાં શિવપત્નીં
ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૬॥

યસ્યાઃ કુક્ષૌ લીનમખણ્ડં જગદણ્ડં
ભૂયો ભૂયઃ પ્રાદુરભૂદુત્થિતમેવ ।
પત્યા સાર્ધં તાં રજતાદ્રૌ વિહરન્તીં
ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૭॥

યસ્યામોતં પ્રોતમશેષં મણિમાલા-
સૂત્રે યદ્વત્ક્વાપિ ચરં ચાપ્યચરં ચ ।
તામધ્યાત્મજ્ઞાનપદવ્યા ગમનીયાં
ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૮॥

નાનાકારૈઃ શક્તિકદમ્બૈર્ભુવનાનિ
વ્યાપ્ય સ્વૈરં ક્રીડતિ યેયં સ્વયમેકા ।
કલ્યાણીં તાં કલ્પલતામાનતિભાજાં
ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૯॥

આશાપાશક્લેશવિનાશં વિદધાનાં
પાદામ્ભોજધ્યાનપરાણાં પુરુષાણામ્ ।
ઈશામીશાર્ધાઙ્ગહરાં તામભિરામાં
ગૌરીમમ્બામમ્બુરુહાક્ષીમહમીડે ॥ ૧૦॥

પ્રાતઃકાલે ભાવવિશુદ્ધઃ પ્રણિધાના-
દ્ભક્ત્યા નિત્યં જલ્પતિ ગૌરિદશકં યઃ ।
વાચાં સિદ્ધિં સમ્પદમગ્ર્યાં શિવભક્તિં (સમ્પદં ઉચ્ચૈઃ)
તસ્યાવશ્યં પર્વતપુત્રી વિદધાતિ ॥ ૧૧॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
ગૌરીદશકં સમ્પૂર્ણમ્ ॥

Encoded by Sridhar Seshagiri

*Gauridashakam*

pdf was typeset on June 11, 2024

Please send corrections to *sanskrit@cheerful.com*